सर्वपर्याणि यान्यनिर्दशाहं तान्यपि सन्धिनीस्यन्दिनीविवत्सायमसूक्षीरं चामेध्यभुजश्च” विष्णुः । पीत्वोपवसेदित्यनुवृत्तिः। सन्धिनी वृषभाक्रान्ता स्यन्दिनी नित्यं प्रस्रवत्पयःस्तना । अमेध्यभुजः मद्यादिभक्षणशीलायाः । यमसूर्वत्सयुग्मं प्रसूता “हस्तवत्या निन्दितं रासभञ्च पयो वर्ज्जयेदिति” हारीतः। तत्राजाक्षीरं दशाहादर्वाक् निषिद्धम् ऊर्द्ध्वं तत् पेयं सर्ववचनसामञ्जस्यात् “गोघ्रातं शकुनोच्छिष्टं पदास्पृष्टञ्च कामतः । सन्धिन्यनिर्दशावत्सगोपयः परिवर्ज्जयेत् याज्ञ०।“क्षीराणि यान्यभक्ष्याणि तद्विकाराशने पुनः सप्तरात्रं व्रतं कुर्य्यादित्यादि” या० । “उष्ट्रीक्षीरमानुषीक्षीरपाने पुनरुपनयनं तप्तकृच्छ्रञ्चेत्यादि” शाता० । “उद्धृतस्नेहविलयनपिन्याकमथितप्रभृतीनि चात्तवीर्य्याणि नाश्नीयात्” गौत०। उद्धृतस्नेहं,क्षीरादि विलयनं घृतमलं पिन्याकः खलिः मथितं तक्रादि आत्तवीर्य्याणि गृहीतसाराणि ॥ आत्तवीर्य्यपदश्चात्यन्तोद्धृतस्नेहपरं मथितपदं च उदकप्रायतक्रपरञ्च । “क्षत्रियश्चैव वृत्तस्थो वैश्यः शूद्रोऽथ वा पुनः । यः पिबेत् कपिलाक्षीरं न ततोऽन्योऽस्त्यपुण्यकृत्” आप० । “कापिलं यः पिबेच्छूद्रो नरकेण विपच्यते” स्मृतिः। सुश्रुते तु धातुदोषविशेषजनकतया कानिचिदपेयान्युक्तानि तानि प्रायशः सामान्यतोऽपेयशब्दे २२६,२७, पृष्ठे उक्तानि । तत्र विशेषः कश्चित् प्रदर्श्यते “वर्षाजले गाङ्गेयत्वसामुद्रत्वपरीक्षणमुक्त्वा “वर्णान्यत्वे सिक्थक्लेदे च सामुद्रमिति विद्यात्तन्नोपादेयमित्युक्तम् कीटमूत्रपुरीषाण्डशवकोथप्रदूषितम् । तृणपर्णोत्करयुतं कलुषं विषसंयुतम् योऽवगाहेत वर्षासु पिबेद्वापि नवं जलम् । स वाह्याभ्यन्तरान् रोगान् प्राप्नुयात् क्षिप्रमेव तु तत्र यत् शैवालपद्मतृणपङ्कप्रभृतिभिरवच्छन्नं शशिसूर्य्यकिरणैर्नाभिजुष्टं गन्धवर्णरसोपसृष्टञ्च तद्व्यापन्नमिति विद्यात्। तस्य स्पर्शरूपरसगन्धवीर्य्यविपाकाः दोषाः षट् सम्भवन्ति ।व्यापन्नं वर्ज्जयेन्नित्यं तोयं यद्यप्यनार्त्तवम् । दोषसञ्जननं ह्येतन्नाददीताहितन्तु तत् । “व्यापन्नं सलिलं यस्तु पिबतीहाप्रसाधितम् । श्वयथुं पाण्डुरोगञ्च त्वग्दोषमविपाकताम् । श्वासकासप्रतिश्यायशूलगुल्मोदराणि च । अन्यान् वा विषमान् रोगान् प्राप्नुयात् क्षिप्रमेव चेति” नदीविशेषजलस्य दोषकीर्त्तनेनापेयता च तत्रोक्ता “पूर्व्वाभिमुखास्तु न प्रशस्यन्ते गुरूदकत्वादिति । सह्यप्रभवाः कुष्ठं जनयन्ति, विन्ध्यप्रभवाः कुष्ठं पाण्डुरोगञ्च, मलयप्रभवाः क्रमीन्, महेन्द्रप्रभवाः श्लीपदोदराणि, हिमवत्प्रभवाः हृद्रोगश्वयथुशिरोरोगश्लीपदगलगण्डान्, प्राच्यावन्त्याः अपरावन्त्याश्चार्शांस्युपजनयन्ति, इति “सामुद्रमुदकं विस्रं लवणं सर्व्वदोषकृदिति । अनेकदोषमानूपं वार्य्यभिष्यन्दि गर्हितमिति” च। रोगभेदे शीतलजलस्यापेयताप्युक्ता, “पार्श्वशूले प्रतिश्याये, वातरोगे गलग्रहे, आध्माते स्तिमिते कोष्ठे सद्यः शुद्धे नवज्वरे।हिक्कायां स्नेहपीते च शीताम्बु परिवर्ज्जयेदिति”। तक्रस्यापेयता रोगभेदे तत्रोक्ता “तक्रं नैव क्षते दद्यान्नोष्णकाले न दुर्बले । न मूर्च्छाभ्रमदाहेषु न रोगे रक्तपैत्तिके । शीतकालेऽग्निमान्द्ये च कफोत्थेष्वामयेषु चेति”। द्रव्यान्तरसंयोगादपेयता अपथ्यशब्दे २२६,२७, पृष्ठे दर्शिता । विशेषस्त्वेषः। “उष्णोदकानुपानन्तु स्नेहानामथ शस्यते, ऋते भल्लातकस्नेहात् स्नेहात्तौवरकात्तथेति” रोगभेदेऽनुपाननिषेधेन तत्र जलादीनामपेयता भङ्ग्या तत्रैव दर्शिता । अनुपानगुणमभिधाय “न पिबेच्छ्वासकासार्त्तौ रोगे चाप्यूर्द्ध्वजत्रुगे। क्षतोरस्कः प्रसेकी च यस्य चोपहतः स्वरः । पीत्वाऽध्वभाष्याध्ययनगेयस्वप्नान्न शीलयेत्। प्रदुष्यामाशयं तद्धि तस्य कण्ठोरसि स्थितः । मन्दाग्निसादच्छर्द्द्यादीनामयान् जनयेत् बहूनिति” सुश्रुते ॥ [अदत्ते

**अपेशल** त्रि० विरोधे न०त० । पेशलत्वविरोधिमान्द्ययुक्ते

**अपेहिकटा** स्त्री अपेहि अपगच्छ कट ! इत्युच्यते यस्यां क्रियायाम् मयू०स० । कटसम्बोधनकापगतिनिर्देशक्रियाविशेषे । एवं मयू० समासे । अपेहिद्वितीया, अपेहिप्रथमा, अपेहिवाणिजा अपेहिस्वागता एतेऽपि शब्दाः तत्तत्सम्बोधनकागमनक्रियानिर्देशे ।

**अपैशुन** न० अभावे न०त० । १ पैशुन्याभावे न०ब० । २ पैशुन्यशून्ये त्रि० अपैशुन्यमप्युक्तार्थे न० तद्वति त्रि०

**अपोगण्ड** त्रि० अपसि कर्म्मणि गण्डः त्याज्यः । विकलाङ्गे “विकलाङ्गं हि सर्वत्र धर्म्मकार्य्येषु वर्ज्जयेदिति” स्मृतेः स हि वैधकर्म्मसु त्याज्यः । २ अतिभीरौ सोऽपि हि कर्ममात्रे त्याज्यः । अपसि अगण्डः अवीर इति वा तस्य कर्मणि अवीरत्वात्तथात्वम् । अपोजलमिव भङ्गियुक्तत्वात् गण्ड एकदेशोऽस्य । ३ त्रिवलियुते मध्यभागे वलीनामेव तस्य तरङ्गाकारत्वात् तथात्वम् । अपसि कर्मणि त्याज्यः गण्डः अपटुत्वात् पोगण्डः शिशुः न०त० । पोगण्डः पञ्चमादब्दादर्वाक् च दशमाब्दतइत्युक्ते पञ्चाब्दे बाले । पोगण्डभिन्नशिशोरेव तथात्वात् । “बाल आषोड़शात् वर्षात् पोगण्डश्चेति शब्द्यत” इति नारदोक्तपोगण्डभिन्ने ५ षोड़शवर्षातीतवयस्के च “अजड़श्चेदपोगण्डो